## लिट् च । (११५/२१७२)

लिडादेशः तिङ आर्धधातुकसञ्ज्ञो भवति । सार्वधातुक[1]सञ्ज्ञाया अपवादः । पेचिथ । शेकिथ । जग्ले । मम्ले । ननु च एकसञ्ज्ञाधिकारादन्यत्र [2]समावेशो भवति ? सत्यमेतत् । इह तु एवकारोऽनुवर्तते, [3]स नियमं करिष्यति[4] ॥

## लिङाशिषि । (११६/२२१८)

आशिषि विषये यो लिङ[5] स आर्धधातुकसञ्ज्ञो भवति । सार्वधातुक[6]सञ्ज्ञाया अपवादः । समावेशश्चैव[7]कारानुवृत्तेर्न भवति । लविषीष्ट । [8]पविषीष्ट । आशिषि इति किम् ? लुनीयात् । [9]पुनीयात् ॥

## छन्दस्युभयथा । (११७/३४३८)

छन्दसि विषये उभयथा भवति, सार्वधातुकमार्धधातुकं च । किं [10]लिङेवानन्तरः सम्बध्यते ? नैतदस्ति, सर्वमेव प्रकरणम[11]पेक्ष्यैतदुच्यते । तिङशिदादि[12] छन्दस्युभयथा [13]भवति । 'वर्धन्तु त्वा सुष्टुतयः' (ऋ. ७. ९९.७) । आर्धधातुकत्वाण् [14]णिलोपः । वर्धयन्तु इति प्राप्ते । शेषं च सार्वधातुकम् – [15]'स्वस्तये नावमिवारुहेम' (ऋ. १०.१७८.२) । क्तिनः सार्वधातुकत्वादस्तेर्भूभावो [16]न भवति । लिट्[17] सार्वधातुकम् – 'ससृवांसो [18]विशृण्विरे' (ऋ. ४.८.६)। इम इन्द्राय सुन्विरे (ऋ. ७.३२.४) । [19]लिङ उभयथा भवति । 'उप स्थेयाम [20]शरणा बृहन्ता' (ऋ. ६.४७.८) । सार्वधातुकत्वात्[21] लिङः सलोपः (७.२.७९/२२११), आर्धधातुकत्वात् एत्वम्[22] । 'व्यत्ययो बहुलम्' (३.१.८५/३४३३) इत्यस्यैवायं प्रपञ्चः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ
तृतीयाध्यायस्य चतुर्थः पादः ॥

———(:०:)———

---

1. °सञ्ज्ञापवादः अ. 2. सञ्ज्ञा फ. 3. स नियमार्थो भविष्यति ह. 4. आर्धधातुकमेवेति इत्यधिकम् क. 5. विहितः तदादेशाः तिङः आर्धधातुकसञ्ज्ञा भवन्ति ब.ह. 6. °सञ्ज्ञापवादः फ.ह. 7. °अनुवर्तनान्न क. 8. पविषीष्ट नास्ति क. 9. पुनीयात् नास्ति क. 10. लिङ अनन्तरः ब. 11. अवेक्ष्य ह. 12. सर्वमेव इत्यधिकम् ब.फ. 13. भविष्यति फ. 14. सिलोपः ब. 15. स्वस्तये तार्क्ष्यमिहाहुवेम अ.फ.ह. 16. न नास्ति अ. 17. च इत्यधिकम् फ. 18. विक्रण्विरे ह. 19. लिङि ब. 20. शरणं बृहन्तम् मुद्रितः पाठः 21. तु इत्यधिकम् क. 22. भवति इत्यधिकम् फ.